PARAŚURĀMASŪTRAM

Pages, 41 Lines, 21 on a page

Begins on fol 64*a* of the MS. described under No 3832

Complete

Same work as the above

No 5676. परापूजाप्रयोगः.

PARĀPŪJĀPRAYOGAH

Pages, 13 Lines, 17 on a page

Begins on fol 73*a* of the MS described under No 5574

Complete

On how to conduct the worship of Śakti as the Supreme goddess.

Beginning:

श्रीआत्मानन्दनाथाय नम । सङ्कल्पन्यासजपानन्तर परापूजां कुर्यात् । आदौ पराया ऋष्यादिक कृत्वा, सा वर्णसम्पुटी(टिते)ति ध्यात्वा, ताळत्रयसम्पुटीकरणशिखाबन्धनदिग्बन्धनं च कृत्वा, मही मूलेति ध्यात्वा ।

End:

पादौ प्रक्षाळ्य, गन्धादिभिरलङ्कृत्य, शक्तिपात्री दद्यात् ।

अळिपात्रमिद तुभ्य दीयते पिशितान्वितम् ।
स्वीकृत्य सुभगे देवि श्रिय देहि रिपूञ्जहि ॥

इति दत्वा, पुनर्मन्त्रः—

वत्स तुभ्यं मया दत्त पीतशेषं कुलामृतम् ।
तव शत्रून् हनिष्यामि सर्वाभीष्टं ददामि ते ॥

यथाशक्ति परां जप्त्वा, महापादुकां शम्भुचरण च स्मृत्वा, ऐं ह्रीं श्री इत' पूर्व देहबुद्धिप्राणप्रमातृधर्माधिकारजाग्रत्स्वप्न . .
. . . . . तत्सर्वं स्वात्माभिन्नब्रह्मार्पणमस्तु स्वाहा इत्यर्पण कुर्यात् ॥

श्रीआत्मानन्दनाथाय नम' ।

No 5677. पात्रपूजा.

PĀTRAPŪJĀ

Pages, 4 Lines, 5 on a page

Begins on fol 72*b* of the MS described under No 5660

Incomplete

On the rites to be conducted in relation to the vessels kept in connection with the worship of the goddess Śakti The names of these vessels are given under the next number.

Beginning:

केशवाय नमः, नारायणाय नम, ... ऐं क्लीं सौः समस्तप्रकटविकटगुप्तगुप्ततरसम्प्रदायकुळकौळिनी . . . गणचक्र-श्रीपादुकां पूजयामि तर्पयामि नम ।

End:

ऐं क्ली सौः सर्वतत्त्व सर्वशरीर परिशोधयामि योहोदि(जुहोमि)-स्वाहा ॥

No 5678. पात्रविवरणम्—आन्ध्रटीकासहितम्.

PĀTRAVIVARANAM WITH TELUGU COMMENTARY

Page, 1 Lines, 5 on a page

Begins on fol 70*a* of the MS described under No 5660

Complete

A description of the vessels to be used in the conduct of Śakti worship

Beginning and end:

श्रीपात्र शक्तिपात्र च भोगपात्र गुरु बलिम् ।
अळिपात्रमिद तुभ्य यावत्तृप्ण गृहाण हे ॥

No 5679. बालात्रिपुरसुन्दरीपूजाक्रमः.

BĀLĀTRIPURASUNDARĪPŪJĀKRAMAH

Pages, 18 Lines, 5 on a page

Begins on fol 13*a* of the MS described under No 5541.

Complete

On details connected with the worship of the goddess Śakti conceived as a young girl

Beginning:

ओं नम· प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

शुद्धद्रव्यभरितयागगृह गत्वा, द्वारदक्षिणपार्श्वयोः श्रीं ह्रीं क्लीं वां वास्तुपुरुषाय नम । स्वर्णादिपुटेन श्रीचक्रराज विलिख्य, मूलेन पुष्पाञ्जलिं दत्वा ।

End:

इति चक्रोद्वासनम् ।

अन्नमादाय ध्यानं कृत्वा—

वामे पायसपूर्णहेमकलश पाणौ वहन्ती मुदा
चान्ये पाणितले सुवर्णरचितां दर्वीं च भूषोज्वला[म्] ।
अम्बा शुद्धदुकूलवस्त्रवसना कारुण्यपूर्णेक्षणा
श्यामा काचन शङ्करप्रियतमा शातोदरी दृश्यते ॥

अन्नं गुरुसमर्पण कृत्वा सर्वेभ्यो दत्वा ।

Colophon:

इति समाप्तः ॥

यन्त्रोद्धारणक्रम —

बिन्दुत्रिकोणषट्कोणकोणमष्टदल तथा ।
चतुरश्र चतुर्द्वारं बालायन्त्रं प्रयच्छति ॥

अय यन्त्रोद्धारणक्रम. ॥

No 5680. बालात्रिपुरसुन्दरीपूजाविधि.

BĀLĀTRIPURASUNDARĪPŪJĀVIDHIH

Substance, palm-leaf Size, 8⅝ × 1⅜ inches Pages, 26 Lines, 5 on a page Character, Telugu Condition, good Appearance, new

Begins on fol 10*a* The other works herein are Sudarśanayantra 1*a*, Sudrśanamantra 5*a*, Astāksarīmantra 23*a*

Complete

Similar to the above.

Beginning:

श्रीबालात्रिपुरसुन्दर्यै नमः ।

विविक्तपुष्पमालालङ्कृत सुधूपित वराङ्गनाधिष्ठित पूजासनद्रव्यपरिपूरित सर्वलक्षणसम्पन्न यागगृह गत्वा ऐं ह्रीं श्री अप्रतिघातस्तम्बादेवीश्रीपादुका पूजयामि तर्पयामि नमः ।

End:

सौं शिवतत्त्व कारणदेह परिशोधयामि । ऐं क्लीं सौं सर्वतत्त्वमह कारणदेह परिशोधयामि स्वाहा ॥

Colophon:

श्रीबालात्रिपुरसुन्दरीपूजा समाप्त(प्ता) ॥

No 5681. बालापद्धतिः.

BĀLĀPADDHATIH

Pages, 3 Lines, 14 on a page

Begins on fol 256*b* of the MS described under No. 424

Complete

Similar to the above

Beginning:

अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ।
दक्षिणामूर्तिरूपाय गुह्या(नित्य)मेव नमो नमः ॥
श्रीनाथादिगुरुत्रयं . . . मण्डलम् ॥
गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माण गिरिजां लक्ष्मीं वाणी वन्दे विभूतये ॥

ऐं रक्तचरणाभ्या नम रक्तचरणाम्बाश्रीपादुका पूजयामि । क्लीं शुक्लचरणाभ्या नम शुक्लचरणाम्बाश्रीपादुकां तर्पयामि नमः ।

End:

सौ सोममण्डलाय मायाकायशोधनार्थं शिवतत्त्वेन कारणदेहं परिशोधयामि जुहोमि स्वाहा । आर्द्रा ज्वलन्ती स्वाहा ।

No 5682. बालापद्धति.

BĀLĀPADDHATIH

Pages, 5 Lines, 11 on a page

Begins on fol 15*b* of the MS described under No 5665
Incomplete
Similar to the above

Beginning:

बालापद्धतिर्लिख्यते—

द्वारपूजां कुर्यात् गणेशश्री । दूतश्री । त्रे(क्षेत्र)पालश्री । दूतिकाश्री । द्वारश्रियै नम ।

End:

शिरसि सहस्रदळपद्मकर्णिकायां बालां मनसा सर्वोपचारैः सम्पूज्य.

No 5683. बालापद्धति..

BĀLĀPADDHATIH.

Substance, palm-leaf Size, $7\frac{1}{2} \times 1\frac{3}{8}$ inches Pages, 17 Lines, 8 on a page Character, Kanarese Condition, injured Appearance, old

Begins on fol 22*a* The other works herein are Vāgvādinīmantra 1*a*, Ganapatipūjāvidhi 4*a*, Bālāparamēśvarīmantra 16*a*, Amrtasiddhēsvarīmantra 19*a*, Bālātripurasundarīmantra 21*a*, Śāntistava 30*a*, Sūryanārāyanapūjā 33*a*, Svarnākarsanabhairavamantra 46*a*, Mantradēvatāprakāsikā 51*a*, Pranavamātrkābhuvanēsvarīmantravidhāna 94*b*, Ajapāmantra 95*a*, Sanksēpadēvīmāhātmya, Kumārīstōtra 96*a*, Candikāhrdaya 98*b*, Ajapāmantra, Āvaranapūjā 101, Mātrkāmantrabhajana 103*a*, Pañcākṣarī-

vidyā 106*a*, Mahāganapativīdhāna 114*a*, Vāgīsvarīdhyāna 121*a*, Tribhuvanamōhinītripurāmantra 125*b*

Complete

Similar to the above

See under No 5630 for the beginning.

End:

शक्तीश्वर्यै नम इति कुलदीपग्रहणम् । शान्तिस्तव पठन् श्रीपात्र-मुद्धृत्य यथासुखं विहरेत् ॥

Colophon:

इति बालापद्धति ॥

No 5684. बालापूजापद्धति..

BĀLĀPŪJĀPADDHATIH

Pages, 10 Lines, 13 on a page

Begins on fol 195*a* of the MS described under No 424

Complete

Similar to the above

Beginning:

आनन्दमानन्दकर प्रसन्नं ज्ञानस्वरूप निजभावयुक्तम् ।
योगीन्द्रमीड्य भवरोगवैद्य श्रीमद्गुरु नित्यमह नमामि ॥
श्रीनाथादिगुरुत्रय गणपति पीठत्रय भैरव
सिद्धेभ्यो वटुकत्रयं पदयुग दूतीक्रम शाम्भवम् ।
वीरेशाष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहित वन्दे गुरोर्मण्डलम् ॥

पूजापद्धतिः—

तत्र ग्रहप्राङ्गणैकदेशे प्रत्यङ्मुखासन आजानु पादौ मणिबन्धौ पादौ पाणी प्रक्षाळ्याचम्य, द्वारदेशे स्थित्वा सामान्यार्घ्यं कृत्वा द्वारपूजां कुर्यात् ।

End:

श्रीपात्रमुद्धृत्य देवी(व्यै) समर्प्य गृह्णीयात् । कौलपात्रं दद्यात् । शान्तिस्तवं पठेत् । नीराजनादिक दद्यात् । यस्य स्मृत्येति गुरुदेवतां समर्चयेत् ॥

No. 5685. बालापूजाविधानम्.

BĀLĀPŪJĀVIDHĀNAM

Pages, 5 Lines, 20 on a page

Begins on fol 127*b* of the MS described under No 2373
Complete
Forms part of the Tripurāsiddhānta
Similar to the above

Beginning:

पूजाविधान वक्ष्यामि बालायाः परमेश्वरि ।
यस्य श्रवणमात्रेण पूजासिद्धिर्भवेन्नृणाम् ॥
इन्द्रमग्नि यमं वन्दे नैर्ऋति वरुण भजे ।
वायुं कुबेरमीशानं ब्रह्माण केशव भजे ॥

* * * *

एवं देवान्द्वारपालान्समाराध्य नरोत्तमः ।
भूतशुद्ध्यादिक (साधु) कुर्यादेकाग्रमानसः ॥
ततो यन्त्र लिखेद्धीमान् बिन्दुमादौ लिखेन्नरः ।
त्रिकोणं विलिखेत्पश्चात् षट्कोण विलिखेत्तत ॥

* * * *

सस्थाप्य दक्षिणे भागे पूजाद्रव्यमनुत्तमम् ।
कलशं स्थापयेद्भागे दक्षिणे मानवोत्तम ॥

End:

लभेत्परमसौन्दर्यं सर्वैश्वर्यमवाप्नुयात् ।
परमायुरवाप्नोति कदापि न भयं भवेत् ॥

सर्वान् मनोरथान् शीघ्रं प्राप्नोत्येव सुदुर्लभाम्(न्) ।
तिष्ठति त्रिपुरालोके सो(मोद)ते नात्र सशय ॥

Colophon.

इति श्रीमहात्रिपुरासिद्धान्ते बालापूजाविधान नाम अष्टादश. कल्प संपूर्ण ॥

No 5686. बालापूजाविधानम्
BĀLĀPŪJĀVIDHĀNAM

Substance, palm-leaf Size, $14\frac{7}{8} \times 1\frac{3}{8}$ inches Pages, 6 Lines, 5 on a page Character, Telugu Condition, good Appearance, old

Begins on fol 15*a* The other works herein are Śarabhasalvamantra 1*a*, Svapnavārāhīmantra 1*b*, Vasyavārāhīstōtra 2*a*, Rajasvalastōtra 2*b*, Ucchistaganapatimantra 4*a*, Bagalābrahmāstramantra 6*a*, Saubhāgyavidyēsvarīmantra 6*b*, Laghumātangēsvaramantra 7*b*, Tiraskarinīmantra 8*a*, Annapūrnēsvarīmantra 8*b*, Bhuvanēsvaryastōttaraśatanāmastōtra 10*a*, Kirātavārāhīmantra 11*a*, Saurāstāksarīmantra 12*b*, Aghōravīraśarabhasālvamantra 14*a*, Trailōkyamōhinīkavaca 18*a*, Brahmāstrabagalāmukhīpītāmbarīsahasranāmastōtra 26*a*, Pītāmbarīsahasranāmastōtra 32*a*, Mahālaksmīhrdayastōtra 42*a*, Ambāstaka 50*a*, Bhairavāstaka 51*a*, Pañcamukhahanūmatkavacastōtra 53*a*, Vīrabhadramālāmantra 53*b*, Hanūmadaghōramantra 54*a*, Śuddhasaktimālāmantra 56*a*, Yaksinīprayōga 62*a*

Complete

Same work as the above.

No 5687. भूतशुद्धिः.
BHŪTAŚUDDHIH

Pages, 3 Lines, 10 on a page

Begins on fol 182*b* of the MS described under No 124.

Complete

On self-purification preliminary to the commencement of the worship of Śakti

Beginning:

भूतशुद्धिविधि कुर्यात्प्राणायामक्रमेण हि ।
आत्मदेहौ पृथक्कृत्वा साक्षी भूत्वा चिदम्बरे ॥
चिच्चन्द्रमण्डले जीव स्थापयेदथ मन्त्रत ।
अस्त्रेण रक्षयेद्धीमान् नादशुद्धिं विधाय च ॥
आसने सम्यगासीनो वामेनापूर्य चोदरम् ।
कुम्भकेन त्रिरावृत्त्या दक्षिणेन च रेचयेत् ॥

End.

मूलविद्यात्रयावृत्त्या तुर्येण ब्रह्मरन्ध्रके ।
द्वादशान्तेन्दुविगळत्पीयूषेणात्मनस्तनुम् ॥
संप्लाव्य तन्मयो भूयादात्मरक्षा भवेदियम् ।
आत्मरक्षां विधायैव मातृकान्यासमाचरेत् ॥

No 5688. भूतशुद्धि.

BHŪTAŚUDDHIH

Pages, 5 Lines, 24 on a page

Begins on fol 141*a* of the MS described under No 5643
Complete
Same work as the above

No 5689. भूशुद्धिः.

BHŪŚUDDHIH

Pages, 4 Lines, 10 on a page

Begins on fol 181*a* of the MS described under No. 124
Complete

Regarding the purification of the ground preliminary to the performance of Pūjā

Beginning :

देशकालविरोधेन विस्तरात्कर्तुमक्षम ।
गणेशं क्षेत्रप यष्ट्वा पुरुषं वास्तुसज्ञकम् ॥
पूजयेद्द्वारपूजेय श्रीविद्यार्चनकर्माणि ।

ऐं ह्री श्रीं ग गणपतये नम द्वारदक्षिणे, ऐं ह्री श्री क्ष क्षेत्रपालाय नम ।

End :

एतास्समयविद्याश्च जपेत्प्रत्यूहशान्तये । एव रक्षा स्वात्मनि विधाय, गुरूपदेशरीत्या स्वपुरतो यन्त्रोद्धार विभाव्य, भूतशोधनमाचरेत् ॥

No 5690. भूशुद्धि..
BHŪŚUDDHIH

Pages, 6 Lines, 24 on a page

Begins on fol 138*b* of the MS described under No 5643
Complete
Same work as the above

No 5691. महास्वच्छन्दसारसङ्ग्रहः.
MAHĀSVACCHANDASĀRASANGRAHAH

Pages, 26 Lines, 26 on a page

Begins on fol 1*a* of the MS described under No 5635
Patalas 9 to 44 complete, 45th incomplete
On details connected with the worship of the goddess Śakti

Beginning :

श्रीनाथ भैरवीनाथ श्रीमत्स्वच्छन्दभैरव ।
आख्यातं भैरवीज्ञानं त्वया सर्वागमेष्वपि ॥
तत्सर्व सङ्ग्रहेणैव श्रोतुमिच्छामि भैरव ।

शिवः —

तत्सर्वमखिल वक्ष्ये यत्त्वया परिपृच्छितम् ।
मन्त्रोद्धारविधि पूर्व विद्याकरणमेव च ॥
मन्त्रविद्याविशेषाणि न्यासमन्त्राण्यनन्तरम् ।

End :

इति श्रीमहास्वच्छन्दसारसङ्ग्रहे आचार्याभिषेकविधानपटलश्चतुश्चत्वारिंश[तितम] ॥

अथान्त्येष्टि प्रवक्ष्यामि समासाच्छृणु सुन्दरि ।
समयापुत्रकाना च साधकाना विशेषतः ॥

* * * *

ईशात्सदाशिवो योज्यो नासिके गुरुणा प्रिये ।
तस्मिन् पुरवराविद्या असङ्ख्याता गुणान्विता ॥

No 5692 महास्वच्छन्दसारसङ्ग्रह .

MAHĀSVACCHANDASĀRASANGRAHAH

Pages, 113 Lines, 11 on a page

Begins on fol 30*a* of the MS described under No 5566
Patalas 9 to 44 complete , 45th incomplete
Same work as the above

No 5693. मातृकाचक्रविवेक .

MĀTRKĀCAKRAVIVĒKAH

Pages, 6 Lines, 14 on a page

Begins on fol 180*a* of the MS described under No. 5617
Complete

On the goddess Śakti as represented by the letters of the alphabets and as identified with the soul by Svatantrānanda-nāthe

Contains the following Khandas —

१. तात्पर्यविवेक .	४. जाग्रद्विवेकः.
२. सुषुप्तिविवेक .	५ तुर्यविवेक .
३. स्वप्नविवेक .	६. मातृकाचक्रसङ्ग्रहः.

Beginning:

जाग्रत्सुषुप्तिकृतदक्षिणवामभागां स्वप्नस्वभावपरिकृप्तजघन्यभागान्(म्) ।
तुर्यातितुर्यघटिताननहृत्प्रदेशां प्राणेश्वरीं परशिवस्य परामृशाम ॥
स्पर्शस्वरोल्लिखितजागरसुप्त्यवस्थामन्तस्थसूचित(सुषुप्त्यु)दितप्रबोधाम् ।
ऊष्मोक्तजागरदशोदितसुप्त्यवस्थां मन्त्रोत्करस्य जननीं मनसा विशाम ॥
सङ्कोचसश्रयणवर्जनभावभङ्ग्या जाग्रत्सुषुप्तिदशयोर्गमकौ प्रयत्नौ ।
दौ(द्वौ)स्पृष्टताविवृतते विदितौ सुधीभिः स्पर्शश्च(स्व)राक्षस(र)गतां परि-
[शीलयामः ॥

End:

अन्तस्तमेव चतुरश्रमुषर्बुधेन्द्वोरर्कात्मकं चिदचिदुद्भवमेतदङ्गम् ।
एवञ्च सत्यपि जडाजडसारमेतत्प्रागेव पूज्यमिति पूर्णपदे कृत तत् ॥
इति परमरहस्यं मातृकार्थस्वरूप स्फुटतरमुपदिष्टं चक्रराजाभिनीतम् ।
लगति यदयमर्थः शक्तिविद्धेऽन्तरङ्गे न तु पुनरपरत्र प्रत्यवायो न तन्मे ॥

Colophon:

इति मातृकाचक्रविवेके तुर्यविवेकः पञ्चम खण्ड ॥
मातृकाचक्रविवेकमूल सपूर्णम् ॥

No **5694.** मातृकाचक्रविवेक .

MĀTRKĀCAKRAVIVĒKAH

Substance, paper Size, 12 × 7¾ inches Pages, 25 Lines, 20 on a page Character, Telugu Condition, good Appearance, old

Begins on fol 1*a* The other works herein are Mātrkācakravivēkavyākhyā 13*b*, Trisatībhāsya 89*b*, Śivasamayānkamātrkā 128*a*.

Complete

Same work as the above

No 5695. मातृकाचक्रविवेकव्याख्या.

MATRKĀCAKRAVIVĒKAVYĀKHYĀ

Pages, 56 Lines, 14 on a page

Begins on fol 182*b* of the MS described under No 5617

Complete

A commentary on the Mātrkācakıavivēka of Svatantrānanda-nātha by Śivānanda

Beginning:

नमस्तेजस्त्रयीसर्गविश्रान्तिस्थानशक्तये ।
तदुत्तीर्णोर्ध्वविश्रान्तिस्फूर्तये गुरुमूर्तये ॥

स्वतन्त्रो नाम सिद्धोऽभूदादिनाथस्य लोचनात् ।
मातृकार्थोपदेशेन लोकाननुजिघृक्षतः ॥

प्रभावादेवदेवस्य स सद्योमातृकार्थवित् ।
रहस्यमेतद्योगेषु योजयेति च शासित ॥

स विसृष्टस्ततस्तेन कनकाचलकन्धरे ।
समाहितमनाश्चक्रे मातृकार्थप्रचिन्तनम् ॥

तस्य मूलमनोरर्थं तत्सूत्रै सजिघृक्षत ।
व्यामूढप्रतिभाशक्ते प्रमेयार्जवनिश्चये ॥

पपात गगनादग्रे श्रीचक्र शिवचोदितम् ।
तदालोक्य महाबिम्बं मातृकार्थप्रकाशकम् ॥

स जातप्रतिभ सद्यो विद्यामाद्यामनेकधा ।
व्याचष्ट सुगमै· सूत्रै तानि सिद्धेषु चार्पयेत् ॥

ते च सिद्धास्तदादेशान्मूलमन्त्रार्थशासनम् ।
पात्रेषु न्यक्षिपन् गुप्त पारम्पर्यप्रवृत्तये ॥

एवं परम्पराप्राप्तमहामन्त्रार्थशासने ।
श्लाघ्यते मातृकाचक्रविवेको नाम सङ्ग्रह ॥

ग्रन्थोऽयमुपदेशैकबोधसिद्धजनप्रिय ।
वृत्त्या विविच्यते लब्ध्या शिवानन्दात्मना मया ॥

आदिसिद्धोपदेशोऽयमनिर्वाह्यः परोक्तिभिः ।
ततः संवादसन्नाहैर्नाद्दतो ग्रन्थविस्तर. ॥

इह खलु परमशिवभट्टारकस्य प्राणभूतया विद्याविद्योभयचमत्कारमय्या स्वरसवाहिन्या विमर्शशक्त्या समुन्मीलितासु बाह्याभ्यन्तरविविधमन्त्रसिद्धान्ताविप्रतिपत्तिषु विलुठतो लोकस्यानुग्रहाय शिवप्रयुक्तस्वतन्त्रानन्दनामा महासिद्ध स्वरसिद्धतया निखिलवाङ्मयनिदानतया च महाप्रमाणस्य मातृकामहामन्त्रस्यार्थोपदेशेन निखिलसशयनिरासनिराकुलं परमार्थस्वरूप निरूपयितुकाम आदौ महामन्त्रार्थरूपिणी भगवतो महादेवस्य महाशक्तिं ग्रन्थस्य पारम्पर्यप्रवृत्तिरूपाभीष्टसिद्धये परामृशति—जाग्रदित्यादि । सुप्तिनिवृत्तौ घटपटादीना चिद्भेदेनानुसन्धानदशा जाग्रत् ।

End:

तदपेक्षया चतुरश्रषोडशदळाष्टदळाना जाग्रत्सुषुप्तिस्वप्नचक्रोपलक्षकाणां बहिस्सन्निवेशकल्पना अनुसरणीया. । ये तु पुनरत्राव्युत्पन्ना तदपेक्षया जाग्रच्चक्रस्य प्राधान्यात् बहिश्चतुरश्रादिचक्रस्य तत् त्रयसन्निवेशेन व्युत्पादितम् । तदीया कल्पना व्युत्पादनमात्रपरा सन्निवेशकल्पनाविवेकेन व्युत्पत्तिमता च साधकजनेन चतुर्दशारपर्यन्त एव श्रीचक्रे सुषुप्त्यादिचक्रत्रयस्य प्रत्येक गन्तव्यमिति शिवम् ॥

Colophon·

इति मातृकाचक्रव्याख्यानं सम्पूर्णम् ॥

No 5696. मातृकाचक्रविवेकव्याख्या.
MĀTRKĀCAKRAVIVEKAVYĀKHYĀ

Pages, 140 Lines, 19 on a page

Begins on fol 13*b* of the MS described under No. 5694
Complete
Same work as the above

No 5697. मातृकाचक्रविवेक —सव्याख्य .
MĀTRKĀCAKRAVIVĒKAH WITH COMMENTARY

Pages, 68 Lines, 22 on a page

Begins on fol 106*a* of the MS described under No 3907
Wants the first Khanda with its commentary
Same work as the above

No 5698. योगिनीहृदयम्.
YŌGINĪHRDAYAM

Pages, 41 Lines, 18 on a page

Begins on fol 131*a* of the MS described under No 5593
Complete
On the worship of Śakti and other deities as represented in the Śrīcakra

Beginning:

श्रीदेव्युवाच—

देवदेव महादेव परिपूर्णकृपामय ।
वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः ॥
तास्तानर्थानशेषेण वक्तुमर्हसि * शङ्कर ।

शङ्कर † उवाच—

शृणु देवि महागुह्य योगिनीहृदयं परम् ।
त्वत्प्रीत्या कथयाम्यद्य गोपितव्यं विशेषतः ॥

---

* भैरव इति पाठान्तरम् † श्रीभैरव उवाच.

कर्णात्कर्णोपदेशेन संप्राप्तमवनीतलम् ।
न देय परशिष्येभ्यो नास्तिकेभ्यो न चेश्वरि ॥
* * * *
चक्रसङ्केतको मन्त्रपूजासङ्केतकस्तथा ।
त्रिविधस्त्रिपुरादेव्यास्सङ्केत परमेश्वरि ॥
यावदेव न जानाति सङ्केतत्रयमुत्तमम् ।
न तावत्त्रिपुराचक्रे परमाज्ञाधरो भवेत् ॥
* * * *

Colophon:

इति श्रीयोगिनीहृदये देवीभैरवसवादे चक्रसङ्केतो नाम प्रथमोपदेश ॥

End:

सर्वेप्सितफलावाप्तिस्सर्वकामफला श्रिय ॥
यतोऽपि दृश्यते देवि कथ विद्यां न चिन्तयेत् ॥
शिवेनाम्ब रहस्यत्वादविस्पष्टतयोदितम् ।
त्वद्रूपरूपवचनात् विवृत नो क्षमस्व तत् ॥

Colophon

इति श्रीयोगिनीहृदये देवीभैरवसवादे पूजासङ्केतो नाम तृतीयोपदेश ॥
समाप्तश्चाय ग्रन्थ ॥

No 5699. योगिनीहृदयम्

YŌGINĪHRDAYAM

Substance, paper Size, 12 × 7¾ inches Pages, 30 Lines, 25 on a page Character, Telugu Condition, good Appearance, new

Begins on fol 1*a* The other work herein is Yōginīhrdaya-dīpikā 17*b*

Complete

Same work as the above

No 5700. योगिनीहृदयम्.

YŌGINĪHRDAYAM

Pages, 22 Lines, 8 on a page

Begins on fol 20*a* of the MS described under No 514
Contains only the first Sankēta
Same work as the above

No 5701. योगिनीहृदयम्.

YŌGINĪHRDAYAM

Pages, 60 Lines, 16 on a page

Begins on fol 33*b* of the MS described under No 5560
Complete
Same work as the above

No 5702. योगिनीहृदयम्.

YŌGINĪHRDAYAM

Pages, 12 Lines, 12 on a page

Begins on fol 137*a* of the MS described under No 5617
Complete
Same work as the above

No 5703. योगिनीहृदयम्—सव्याख्यानम्.

YŌGINĪHRDAYAM WITH COMMENTARY

Substance, paper Size, 9$\frac{3}{8}$ × 7$\frac{5}{8}$ inches Pages, 262 Lines, 16 on a page Character, Telugu Condition, good Appearance, new

Sankētas 1 to 3 complete , but the 3rd is misplaced before the 2nd

The text with the commentary called Yōginīhrdayadīpikā The author of the commentary is Punyānandanātha according to the colophon at the end of chapters 1 and 3, while the colophon

at the end of chapter 2, attributes the authorship of the commentary to Amrtānandanātha, disciple of Punyānanda

Beginning:

जगद्वन्द्यावेतौ गणपवटुकौ विश्वविंनुतौ
जगद्रक्षाशीलौ जपनिरतसायुज्यफलदौ ।
रथाङ्गे सन्नद्धौ रविशशिकृशानूज्वलदृशौ
मयि स्यातां रक्षापरवशधियौ मद्गुरुमयौ ॥
तन्नित्यं ज्योतिषां ज्योतिर्जयत्येकमनुत्तरम् ।
न यद्भासयते सूर्यो न शशाङ्को न पावकः ॥
विमर्शरूपिणी शक्तिरस्य विश्वगुरो परा ।
परिस्फुरति नैकापि नानानामार्थरूपिणी ॥

* * * *

तद्वामकेश्वरे तन्त्रे सूचितार्थान् परावरान् ।
व्यक्तीकर्तुं प्रयतते योगिनीहृदयेऽधुना ॥
मानुषो(ष) हृदयं मर्त्यो वेत्ति नैकोऽपि तत्त्वतः ।
योगिनीहृदय ज्ञातु कस्समर्थश्शिव विना ॥

* * * *

तदनेकार्थसन्दर्भान्नानासङ्केतसङ्कुलम् ।
विवृणोत्यमृतानन्दश्शिवयोरेव शासनात् ॥

इह खलु भगवान् प्रकाशमूर्तिं परमशिवः स्वात्मान विमर्शांशेन विभज्य परापश्यन्त्यादिक्रमात् पृच्छति—श्रीदेव्युवाचेति । शिव एवाहं वैखरीपर्यन्तरे व्यावृत्त्या विमर्शांशेन पृष्टवानिति यावत् ।

Colophon:

इति श्रीमत्परमयोगीन्द्रपरमहंसपुण्यानन्दनाथयोगिप्र(वर)विरचितायां वामकेश्वरतन्त्रे योगिनीहृदयदीपिकाया चक्रसङ्केतः प्रथमस्सपूर्णः ॥

* * * *

Colophon:

इति श्रीमत्परमयोगीन्द्रपुण्यानन्दनाथयोगिप्र(वरवि)राचितायां योगिनी-हृदयदीपिकाया पूजासङ्केतस्तृतीयः ॥

End:

यस्य प्रबोधेन यस्य षड्विधार्थस्य प्रबोधनेन वीरचक्रेश्वरो भवेत् ।
. . . . . .प्रलयप्रतिपादनपरा वीराः
तेषां चक्रं समूहस्तस्येश्वर' परमशिवः तद्विधार्थपरिज्ञाने शिवो भवेदित्यर्थ' ॥

Colophon:

इति श्रीमत्परमहसपरिव्राजकाचार्यपरमयोगीन्द्रपुण्यानन्दनाथशिष्या-मृतानन्दनाथयोगिविरचितायां योगिनीहृदयदीपिकाया मन्त्रसङ्केतो द्वितीयः॥

No 5704. योगिनीहृदयम्—सव्याख्यानम्.

YŌGINĪHRDAYAM WITH COMMENTARY

Pages, 161 Lines, 23 on a page

Begins on fol. 17*b* of the MS described under No 5699

Complete

Same work as the above

No 5705. योगिनीहृदयम्—सव्याख्यानम्.

YŌGINĪHRDAYAM WITH COMMENTARY

Substance, paper Size, $9\frac{5}{8} \times 7\frac{1}{8}$ inches Pages, 136 Lines, 15 on a page Character, Telugu Condition, good, Appearance, new

The first Sankēta complete, the second is wanting and the third is incomplete

Same work as the above

No 5706. योगिनीहृदयम्—सव्याख्यानम्
YŌGINĪHRDAYAM WITH COMMENTARY.

Pages, 235 Lines, 18 on a page

Begins on fol 1*a* of the MS described under No 5608

Complete in 3 Sankētas

Same work as the above

The commentary is by Amrtānandanātha

No 5707 योगिनीहृदयम्—सव्याख्यानम्.
YŌGINĪHRDAYAM WITH COMMENTARY

Pages, 203 Lines, 2 on a page

Begins on fol 1*a* of the MS described under No. 5607

Sankētas 1 to 3 complete, but the third Sankēta is here called Unmēsa An index of this work is found to begin on fol 110*a* and it extends over 9 pages

The text forms part of Vāmakēśvaratantra, and the commentator is Amrtānandanātha, disciple of Panyānanda

Same work as the above

No 5708. योगिनीहृदयदीपिका.
YŌGINĪHRDAYADĪPIKĀ

Pages, 73 Lines, 13 on a page

Begins on fol 143*a* of the MS described under No 5617

Sankētas 1 to 3 complete, the third Sankēta being called Unmēṣa

Same commentary as in the above MS

No 5709. योगिनीहृदयदीपिका.
YŌGINĪHRDAYADĪPIKĀ

Substance, paper Size, 7½ × 6 inches Pages, 398 Lines, 14 on a page Character, Telugu Condition, good Appearance, new

Complete

Same work as the above
There is an index at the end consisting of 14 pages

No 5710 रुद्रयामलोत्तरषट्कम्.

RUDRAYĀMALŌTTARASATKAM

Pages, 7 Lines, 2 on a page

Begins on fol 121*a* of the MS described under No 5617
Complete
The subjects treated in these six Patalas are —

१. षट्चक्रध्यानम्.	४. त्रिपुराध्यानम्.
२. त्रिपुरामन्त्रनिर्णयः.	५. सिद्धयः.
३. कामतत्त्वसाधनम्.	६ विद्याकोश..

Beginning

कङ्केळिशोणं बिभ्राणमङ्के पङ्केरुहालयाम् ।
यं के वदन्ति दन्तीन्द्रं तं केवलमुपास्महे ॥
विद्युत्पुञ्जनिभा नमामि सतत प्राग्भारसूक्ष्मा गिर
मूर्त्या भग्नमृणालतन्तुनिभया निर्भिद्य लिङ्गत्रयम् ।
प्राप्योर्ध्वं च निसर्गभागमुकुलं पीयूषधारारसं
पीत्वा विद्रुतविद्रुमद्रवमयी शक्तिं परां कौळिकीम् ॥
व्योमाम्बुजे सहस्रारे सितकेसरसङ्कुले ।
तत्रासीन महादेवमपृच्छत्कुलनायिका ॥

श्रीदेव्युवाच—

भगवन् देवदेवेश भवनाशन भैरव ।
श्रोतुमिच्छामि देवेश देव्या मन्त्रविनिर्णयम् ॥
लिङ्गत्रयसमायुक्त महापद्मवनं तथा ।
कदम्बगोलकश्चान्यद्ब्रह्मरन्ध्रं विशेषतः ॥

मुद्रापञ्चकसंयुक्त पीठत्रयसमन्वितम् ।
कुलाकुलविभागञ्च सप्तमं कथयस्व मे ॥

* * * *

Colophon:

इति श्रीरुद्रयामले उत्तरषट्के प्रथम· पटल· ॥

End:

एषा हि मूलविद्या च नाम्ना त्रिपुरभैरवी ॥
प्रत्यक्षं जायते देवि त्रिधा सिद्धि ददात्यसौ ।
ददते साधकेन्द्राणामितरा भुवि का तथा ॥
एतत्ते कथितं देवि भुक्तिमुक्तिफलप्रदम् ।
अयोग्यस्य न दातव्यमित्याज्ञा पारमेश्वरी ॥

Colophon:

इति रुद्रयामले उत्तरषट्के षष्ठः पटलः ॥

इति रुद्रयामले सपादलक्षग्रन्थे विद्यापीठावतारिते उत्तरभागे नित्यक्लिन्नाप्रकरणे षड्विद्याप्रकाशायामुत्तरषट्कं सपूर्णम् ॥

No 5711. रुद्रयामलोत्तरषट्कम्.

RUDRAYĀMALOTTARASATKAM

Pages, 16 Lines, 25 on a page

Begins on fol 243*a* of the MS described under No 5616.
Complete
Same work as the above

No 5712. रुद्रयामलोत्तरषट्कम्—कुलदीपिकासहितम्.

RUDRAYĀMALŌTTARASATKAM WITH KULADĪPIKĀ

Pages, 51 Lines, 24 on a page

Begins on fol 251*b* of the MS described under No 5616
Complete
The same as the above work, but with a commentary

Beginning

वन्दे शक्तिं परां शम्भोर्वर्णसङ्घ्रसविग्रहाम् ।
प्राणाद्यारामसङ्क्रीडानिरन्तरधुरन्धराम् ॥
आगमान्तरसंवाददर्शितार्थविनिश्चयाम् ।
व्याख्यामुत्तरषट्कस्य करोमि कुळदीपिकाम् ॥

भगवतश्चैतन्यात्मनस्त्रिय(स्त्र्य)म्बकभट्टारकस्य स्फुरणरूपिण्यास्सार्वकालिकप्रपञ्चसर्गस्थितिसंहारसङ्क्रीडनपरायास्सोमसूर्यवह्न्यात्मकविश्वतैजसप्राज्ञपुरत्रयमन्धुक्षण्या वर्णकदम्बकसङ्कलितदिव्यमूर्तेः परायाश्शक्तेः परमोपास्तिसाधनभूतस्य श्रीमति दक्षिणस्रोतस्यश्रीरुद्रयामळे निखिलजगद्रक्षणाय समुद्घोषितस्यापि श्रीमत्काश्मीरसिद्धिसम्प्रदायदरिद्रैरभागधेयैर्यथातथ्यापरिज्ञानात् स्वमनीषिकया परम्परया कुदेशिकैर्विप्लुतोपदेशस्य श्रीमद्ब्रह्मानन्दप्रकाशकभट्टारकपरमगुरुमुखागमसंवादपवादपुरस्सर श्रीमदुत्तरषट्कस्य कुळदीपिकाख्य विवरणमारभ्यते । तस्य तावदयमाद्यश्लोकः—

व्योमाम्बुजे सहस्रारे सितकेसरसङ्कुले ।
तत्रासीन महादेवमपृच्छत्कुळनायिका ॥ इति ।

तत्र व्योमनाम आज्ञास्थानात् कोदण्डसञ्ज्ञितादूर्ध्वं यच्छिरःकपालान्तराळ तत्र यदम्बुज कुळस्वरूप परमबिन्दुसञ्ज्ञित तद्व्योमाम्बुजम् । तत्र बिन्दो. किरणा अराणि तेषां सहस्रम् अरसहस्रकम् । अरशब्देन दळान्यभिप्रैति ॥

End:

त्रिपुराप्रशस्तिप्रसङ्गेन पुरुषार्थोपयोगिनोऽन्यानपि प्रशस्ततरान् निर्दिशति—

एतदेव स्फुटं देवि भुक्तिमुक्तिफलप्रदम् ।
अयोग्येभ्यो न दातव्यमित्याज्ञा पारमेश्वरी ॥ इति ।

यथोक्त त्रिपुराविद्यारहस्य तदयोग्येभ्यो न दातव्यमिति परमेश्वर-स्याज्ञेति ॥

Colophon

कुदेशिकोपदेशान्धतमस प्रतिघातिनी ।
प्रकाशितरहस्यार्था समाप्ता कुळदीपिका ॥
इत्युत्तरषट्कविवरणे षष्ठ पटलः ॥
नवसु धामसु धाम सुधामय भवननामसु नाम सुनादितम् ।
न हि नमामिनमामितसिद्धये धृतमुदारमुदारमुमामयम् ॥
आविर्भावितवैभव हतभवं भक्त्या भजन्तो भरात्
खण्डोत्तुङ्गितशेखर खरतमस्सन्तापसन्नुत्तये ।
रूप भारतिभारतिप्रकटित सम्भावयन्तो वय
जीवामो वयमायुरग्र्यममल सार्धं प्रकुर्वीमहि ॥
इत्युत्तरषट्कव्याख्यान सम्पूर्णम् ॥

No 5713. रुद्रयामलोत्तरषट्कव्याख्या—कुलदीपिका.
RUDRAYĀMALŌTTARASATKAVYĀKHYĀ KULADĪPIKĀ

Pages, 23 Lines, 12 on a page

Begins on fol 125*a* of the MS described under No. 5617.
Complete
The commentary is the same as in the previous MS

No 5714. लघुचक्रपद्धतिः.
LAGHUCAKRAPADDHATIH

Pages, 6 Lines, 14 on a page

Begins on fol 206*b* of the MS described under No 424
Complete
On the rules regarding the drawing of the Śrīcakra.

Beginning:

ह्रासे देवीकृते तत्तमगलविगते तोषभागे श्च सूत्रान्
कृत्वा पूरीदळान्ते गवलघमुभयोर्वा तयोस्तोयभागान् ।
धान्याशान्मे विमार्जे प्लुधितुवरणाग्राणि सूत्रद्वयानि
प्राक्प्राभ रोधिगान विधिमथवग दिव्यसूनुश्चिर स्यात् ॥

अस्यार्थस्तु—

ह इति द्वयं कथयति । से इति सप्त । एव कटपयादिक्रमेण द्विसप्तत्यङ्गुलानि भवन्ति ।

चक्रोल्लेखनप्रकारस्तु—

षट्त्रिंशदङ्गुलायामं सूक्ष्मसूत्र सम्पाद्य वृत्तक्रमेण वलय कृत चेत् पूर्वोत्तरभागाभ्यां द्विसप्तत्यङ्गुलायाम भवति ।

End:

रुद्राङ्गुलं यद्वसुपत्रसञ्ज्ञिके नवाङ्गुलं षोडशपत्रसञ्ज्ञिके ।

* * * *

शेषाङ्गुळीभि क्रमतस्सुलेख्यं पुरत्रयं हे त्रिपुरे महेशि ।
सूर्यासूर्यसुत च केतुमुड्डु(भृ)द्भूमीसुतो वृत्तक
राहुं सौम्यबुधं च केतुरगमच्छुक्रस्तथा चेन्दुगः ।
सूर्यो राहुरथाङ्गिरसुतश्चाङ्गारक . . ता
मन्दं प्राग्दिशि वृत्तक च विहरेच्चक्र शिवाया. पदम् ॥

No 5715. लघुमातङ्गीकल्प.

LAGHUMĀTANGĪKALPAH

Pages, 12. Lines, 14 on a page

Begins on fol 82*a* of the MS described under No 5673
Complete

On the worship of the goddess Mātangī, who is considered to be a manifestation of Śakti

Beginning :

ओं लघुमातङ्गीपूजाकल्प प्रकारान्तरेण(स) विस्त[ा]र कथ्यते। विध्युक्तेन पूजामण्टपं प्रविश्य द्वारपूजादिकं कृत्वा आसेन उपाविश्य भूमिं प्रार्थयित्वा गुरुं ध्यात्वा गुरुपादोदकप्राशन कृत्वा भूतोच्चाटनं कृत्वा तत दशदिग्बन्धन कृत्वा भूशुध्यादिमातृकादिकं कृत्वा ऋष्यादिन्यासोक्तेन मूलमन्त्र यथाशक्ति जपित्वा स्वपुरतः श्यामलाचक्रं सस्थाप्य ऐं समस्तसिद्धयोगिनीचक्रश्रीपादुकाभ्यां नम.।

End :

त्रिपञ्चाष्टदलं लिख्य कलाश्रं वसुपत्रकम् ।
चतुश्रञ्च (रश्रं)भवेद्देव्यां पूजायन्त्र वरानने ॥

Colophon :

इति श्रीलघुमातङ्गीश्वरीपूजाप्रकरण समाप्तम् ॥

No 5716. ललितार्चनपद्धतिः.
LALITĀRCANAPADDHATIH.

Substance, paper Size, 9⅜×7⅜ inches Pages, 293 Lines, 8 on a page Character, Telugu Condition, good Appearance, new

Begins on fol 1*a*. The other work herein is Saparyākalpavallī 155*a*

Complete

On the worship of the goddess Lalitā as a manifestation of Pārvatī

By Cidānandanātha, the disciple of Svayamprakāśānandanātha

Beginning :

श्रीं ह्रीं तत्र श्रीमान् साधकेन्द्रो रात्रिशेषं समुत्थायावश्यक कृत्वा हस्तौ पादौ च प्रक्षाल्य धौतवाससी परिधायाचम्य देवतायागमन्दिरं सं-

मार्जनानुलेपनवितानाद्यैरलङ्कृत्वा स्वासनस्थः पूजामूर्तेर्माल्यमपकृष्य प्रक्षाल्य पुरतः सस्थाप्य पूर्वदिनपूजावशिष्टपुष्पैस्समष्टिविद्यया त्रिरभ्यर्च्य कर्पूर-शकलैर्दन्तधावन कारयित्वा सुगन्धिजलैर्गण्डूष मुखप्रक्षालन सूक्ष्मवस्त्रेण करास्यप्रोञ्छनञ्च कल्पयित्वा स्वब्रह्मरन्ध्रस्थश्वेतसहस्रदलकमलकर्णिकाया शिवरूपिण श्रीगुरुरूपिण ध्यायेत् ॥

* * * *

Colophon :

इति श्रीमत्स्वयप्रकाशानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीचिदानन्दनाथेन विरचितायां ललितार्चनपद्धत्या गुरुध्यानादिन्यासान्तसग्रहो नाम पूर्वपरिच्छेद. ॥

End :

विस्तरतः कर्तुं सामर्थ्यं देशकाल च लब्ध वापि अलभ्यभावेन कार्येति शिवशासनम् । तस्मात् सामर्थ्यञ्च देशकालाद्यलाभ एवाय सङ्कुचितः पूजावि(धि·) । एव नित्यक्रमेण पूजयितुः सर्वसिद्धिर्भवेत्; अमङ्गलमपि मङ्गलं स्यात् ॥

इति श्रीचक्रपूजाविधिः ॥

श्रीचिदानन्दनाथेन कृताया देशिकाज्ञया ।
ललितार्चनपद्धत्यां परिच्छेदस्तथोत्तर. ॥

Colophon.

इति श्रीमत्स्वयप्रकाशानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीचिदानन्दनाथेन विरचितायां ललितार्चनपद्धत्यामर्चनक्रमो नाम उत्तरपरिच्छेदः ॥

No 5717. वरिवस्यारहस्यम्—सव्याख्यानम्.

VARIVASYĀRAHASYAM WITH COMMENTARY

Pages, 115 Lines, 20 on a page

Begins on fol 1*b* of the MS described under No 5638
First and second parts complete

The name of the work means the secret of worship It deals with the Śrīcakra and Śrīvidyā as appertaining to the worship of Śaktı.

By Bhāsurānandanātha also called Bhāskararāyɹ, son of Gambhīrarājabhāratī and pupil of Nrsimhānandanātha

Beginning.

विद्याना च मनूनां मनुसङ्ख्यानां च विद्यानाम् ।
उपदेष्टा जयति तरां नरसिहानन्दनाथगुरु ॥
वरिवस्यारहस्याख्यो ग्रन्थो यत्स्वेन निर्मितः ।
तत्र दुर्घटशब्दानामर्थस्सङ्क्षिप्य कथ्यते ॥

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् । आचार्यवान् पुरुषो वेद इत्यादिश्रुत्या गुरूपसदनस्य तत्त्वज्ञानजनकत्वात् . . . . . विघ्नविघाताय स्तुवन् सम्प्रदाय तदाज्ञयैव प्रवर्तयति—

* * * * *

इममेवार्थं श्लोकद्वयेनाह—

नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्ति ।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति ॥

इहोत्पादनादित्रयं तिरोधानानुग्रहयोरुपलक्षणम् ।

End:

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति वचनादन्ते मङ्गळमारचयति—

अकथासन ह ळक्षान्तर समासाद्य मामकं ज्ञानम् ।
मामकमेवानन्दं मह्यं ददतो जयन्ति गुरुचरणाः ॥

* * * *

गुरुचरणैकसहायो भास्करररायो जगन्मातु
वरिवस्यातिरहस्य वीरनमस्य प्र(णि)जगाद ॥

वीरै अहमिरणं गच्छे इदमो वैरिणो नाश कुर्वाणैः परापश्चदशिकादौ प्रसिद्धेरिति सर्वमनवद्यम् ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्रश्रीनृसिंहानन्दनाथचरणारविन्दमिळिन्देन श्रीमद्गम्भीरराजभारतीदीक्षितात्मजेन भास्कररायापरनाम्ना भासुरानन्दनाथेन प्रणीत वरिवस्यारहस्य सव्याख्य समाप्तिमगमत् ॥

No 5718. वरिवस्यारहस्यम्—सव्याख्यम्.

VARIVASYĀRAHASYAM WITH COMMENTARY

Substance, paper Size, 9¾ × 3¾ inches Pages, 74 Lines, 13 on a page Character, Telugu Condition, good Appearance, old

The second part only, complete

Same work as the above

No 5719. वामपूजाविधानम्.

VĀMAPŪJĀVIDHĀNAM

Pages, 27 Lines, 7 on a page

Begins on fol 176*a* of the MS described under No 745

Complete

On the worship of Śakti in accordance with the Vāmācāra views

Beginning:

ब्राह्मे मुहूर्त उत्थाय गुरुचरणारविन्दे नमस्कृत्य नवीनमार्ताण्डमण्डलमयूखविराजमानां श्रीमत्त्रिपुरसुन्दरीं ध्यायन् बहिर्निर्गत्य दन्तधावनपूर्वक स्नान परिसमाप्य तन्त्रसन्ध्यामाचरेत् । मूलमन्त्रेण त्रिराचम्य ।

End:

ह्रां नित्यक्लिन्ने मदद्रवे स्वाहा—नि+मः । ओं क्रां भ्रें क्रों त्रौ भ्रौ भ्रौं क्रौ स्वाहा—भैरु+म. । ह्री वह्निवासिन्यै नमः—वर्मो+म । ओं ह्रां फट् क्रों नित्यक्लिन्ने मदद्रवे स्वाहा ॥

No 5720. वामाचारसिद्धान्तसङ्ग्रहः.

VĀMĀCĀRASIDDHĀNTASANGRAHAH

Pages, 4 Lines, 19 on a page

Begins on fol 55*a* of the MS described under No 426

Complete

A treatise in support of the Vāmācāra sect of Śakti worship by Brahmānandanātha

Beginning:

तस्य भासा सर्वमिद विभातीति श्रुतिर्जगौ ।
सच्चिदानन्दरूपं तद्ब्रह्माद्वयमुपास्महे(स्महे) ॥

इह खलु श्रीकाशीस्थेन भट्टोपनामकेन काशीनाथाख्यविदुषा वामाचारखण्डनग्रन्थ कृतः । ततस्तैः भाग्यनगर प्रति प्रेषित· । त दृष्ट्वा तत्रस्थास्सर्वे उपासका· सन्दिहाना हसन्तः कश्चिद्याळु पुरुषधौरेयमन्वेषमाणाः कस्मिश्चित् समये गोदातीरस्थं ब्रह्मानन्दनाथनामान विद्वांसं प्राप्य प्रार्थयामासुः । तथा तेन ब्रह्मानन्दनाथेन तेषा सन्देहनिवृत्त्यर्थं तदीयग्रन्थखण्डनपूर्वक वामाचारसिद्धान्तसङ्ग्रहो नाम ग्रन्थो रच्यते । . . . .

. . . . . ननु.

श्रुतिस्मृती ममैवाज्ञे(य)स्ते उल्लङ्घ्य वर्तते ।
आज्ञाद्रोही मम द्वेषी न भक्तो न च मे प्रियः ॥

इति वचनात् श्रुतिसूत्रागमान् पूर्वचार्यांश्च उल्लङ्घ्य वामाचारप्रकटनमयुक्तमेवेति चेत्न, तेष्वेव श्रुत्यादिषु न कुर्यात्पशुसम्भाषणम् । आत्मरहस्य वदेत्— * * * * इत्यादिवाक्यैः गुरुसंप्रदायरहिताना मलिनधिया देवतान्तरोपासकानां पशूनामेव तन्निषेध श्रूयते न त्रिपुरसुन्दर्युपासकानामित्यनवद्यम् ।

End:

तस्माद्वामाचारस्य त्रैवर्णिकाधिकारित्व श्रुतिसूत्रेतिहासपुराणादेव(ग)मादिभिस्सर्वेष्वपि युगेषु सिद्धमित्यलमतिप्रसङ्गेन ॥

Colophon.

इति गोदावरीतीरस्थेन श्रीब्रह्मानन्दनाथेन विरचितो वामाचारसिद्धान्त-सङ्ग्रह सम्पूर्णमगमत् ॥

No. 5721. वामाचारसिद्धान्तः.

VĀMĀCĀRASIDDHĀNTAH

Pages, 38 Lines, 20 on a page

Begins on fol 80*b* of the MS described under No 524

Contains only the first Patala

On the doctrines of the Vāmācāra sect of Śakti-worshippers by Mahēśvarācārya

Beginning :

श्रीविश्वेश्वरसंज्ञकं स्वजनक वेदागमार्थानुगं
तत्पादस्मृतिसङ्ग्रहप्रकरणान्दृष्ट्वा पुराणास्तथा ।
कुर्वेऽहं गुरुसेवको लघुतर ग्रन्थोत्तम निर्णय
वेदाचारपुराणतन्त्रनियमार्थाना सुबोध परम् ॥

परमकारुणिकेन महेश्वराचार्यवर्येण श्रीगुरुणोपादिष्ट कुळधर्मानभिज्ञ धर्मशास्त्रनिपुण. कश्चिच्छिष्य सन्दिहानः . . . . . भो भगवन् मम मोक्षमार्गोपदेशमन्त्रोऽत्रभवता दत्तः। तस्य पद्धतिमप्युपदिशेति विज्ञापितस्सन् श्रीगुरु शिष्याय ता पद्धतिमर्पयति । ब्राह्मे मुहूर्त इत्यारभ्य सामान्यार्घ्यपर्यन्त कल्पयित्वा अथ क्रमप्राप्त कलशस्थापन कुर्यादित्याह । तल्लक्षणमाह—

कलां कला गृहीत्वा वै देवाना विश्वकर्मणा ।
निर्मितोऽय सुरैरस्मात्कलशस्तेउच्च्य(न कथ्य) ते ॥

End:

इत्यनेन सुगोप्यत्व सुसमी(पो)पायत्व भुक्तिमुक्तिप्रदायकत्वञ्च सूचित मत्वा शिष्योऽपि हर्षोल्लसितवचनेन गद्गदवागाचार्य प्रदक्षिणपूर्व प्रणिपत्य

वेदागमस्मृतिपुराणवाक्यै भगवत्कृपाकटाक्षावलोकनै कृतार्थोऽस्मि निस्सन्देहोऽहमिति कुळधर्मदृढतरो बभूवेति शिवम् ॥

* * * *

Colophon.

इति श्रीमहेश्वराचार्यविरचिते प्रथमद्रव्यसिद्धान्तो नाम प्रथमः पटलः ॥

No 5722. शक्तिन्यासः.

ŚAKTINYĀSAH

Pages, 4 Lines, 6 on a page

Begins on fol 191*a* of the MS described under No 124

Complete

Regarding the ceremonial process of touching certain parts of the body, uttering at the time certain appropriate words forming the Dēvīmantra

Beginning:

अथ शक्तिन्यासः—

तत्र प्रथम जगच्छून्याकार निरालम्बं ध्यात्वा हुं पृथिव्यै नम इति स्वासनाध पृथिवीं सपूज्य, स्वासन वामहस्तेन स्पृशन् भुवनेश्वरीबीज सप्तवार जपित्वा ओं ऐं ह्री श्रीं जयायै ।

End:

यथाशक्ति जपित्वा रक्तपुष्पै स्वशिरसि ऐं ईं सौः आत्मदेहाय नम इति गन्धाक्षतैः [इति]सप्तधा सपूज्य धूपदीपौ नैवेद्य तस्मिन् त्रैपुरे देहे ऐं ईं सौ इति वनिताक्षोभकरीं महाकामकळां ध्यायेत् ॥

Colophon:

इति शक्तिन्यासविधिस्समाप्त. ॥

No 5723. शाक्तसन्ध्याविधिः.

ŚĀKTASANDHYĀVIDHIH

Pages, 4 Lines, 14 on a page

Begins on fol 57*a* of the MS described under No 424

Complete

On the morning and evening prayers to be adopted by the worshippers of the goddess Śakti

Beginning :

ऐं आत्मतत्त्व स्वधा । क्ली विद्यातत्त्वं स्वधा । सौ शिवतत्त्वं स्वधा । इत्याचम्य, बालया प्राणानायम्य, न्यासं कृत्वा, वामकरे जलं निक्षिप्य, अं व र य हं इति पञ्चभूबीजैर्जल विशोध्य बिन्दुमुद्रायां त्रिपुरावागीश्वरीश्रीपादुकां पूजयामीति मार्जनत्रयं कृत्वा ।

End :

एवं ध्यात्वा ऐं क्लीं सौः त्रिपुरसुन्दरी विद्महे कामेश्वरी धीमहि । तन्नोऽनङ्गः प्रचोदयात् । यथाशक्ति जप कुर्यात्.

Colophon :

इति सन्ध्याविधिः ॥

No 5724. शिवसमयाङ्कमातृका.

ŚIVASAMAYĀNKAMĀTRKĀ

Pages, 251 Lines, 25 on a page

Begins on fol 1*b* of the MS described under No 5563

Complete

An exhaustive treatise containing details regarding several important topics connected with the worship of Śakti

Beginning :

प्रकाशानन्दात्मा जयति निजतत्त्व परशिवा
निजेच्छाविर्भूतव्यवहितबहिर्भावविभवा ।

इयं चेच्छाशक्तिस्समरसपरानन्दलहरी
दयालुर्दिव्याज्ञा शिवसमयसाम्राज्यघटनी ॥

* * *

शिवोदितक्रमसमयप्रपञ्चिकां मिताक्षरां शिवसमयाङ्कमातृकाम् ।

* * * *

तत्त्वैस्सशोध्य चाचम्य त्वाचान्तो मार्जयेत्पुन ।
मार्ताण्डमण्डले देवीं चिन्तयेच्चिन्तितार्थदाम् ॥

* * * *

एव सञ्चिन्त्य देवेशीं वाग्भवा श्रीमहापदम् ।
ञ्यादिं पुर समुच्चार्य सुन्दरीति पदं वदेत् ॥

End:

षष्टिर्वर्णा भवन्त्येव मोहाद्वर्गा दिने दिने ।
एवं जपन् कृतजपः षड्दिनादित्यसौ भवेत् ॥

निश्शेषागमजलराशिमन्थनेन श्रीशिङ्गक्षितिपतिना विनिर्मितायाम् ।
विज्ञानामृतरसधाम षोडशोऽयमुल्लासश्शिवसमयाङ्कमातृकायाम् ॥

* * * *

शब्दाद्या विषयास्स्पृशन्तु नितरां नाथाज्ञया मामितो
यद्वा सन्निहिता भवन्तु सतत तेऽमी भवेयुर्यदि ।
भृङ्गालिध्वनिरिक्षुवल्लिविकसत्पद्मादिगन्धत्विषः
स्पर्शश्चैत्रकचन्द्रपादशिशिरो रूपं जपापाटलम् ॥

No 5725 शिवसमयाङ्कमातृका.

ŚIVASAMAYĀNKAMĀTṚKĀ

Pages, 85 Lines, 14 on a page

Begins on fol 273*a* of the MS described under No 5617

Ullāsas 1 to 16 complete

Same work as the above

No 5726. शिवसमयाङ्कमातृका.

ŚIVASAMAYĀNKAMĀTRKĀ

Pages, 255 Lines, 20 on a page

Begins on fol 128*a* of the MS described under No 5694

Complete

Same work as the above

No 5727. शिवार्चनशिरोमणि.

ŚIVĀRCANASIRŌMANIH

Substance, palm-leaf Size, 10½ × 1⅝ inches Pages, 346 Lines, 8 on a page Character, Grantha Condition, good Appearance, old

Incomplete

Contains Ullāsas 16 to 21 The sixteenth Udrēka from the Parānandatantra is quoted herein and referred to in the colophon in a wrong place

On the conduct of the worship of Śakti as given in various Āgama treatises

There are two colophons at the end, of which one attributes the authorship of the work to Śrīnārāyanānandanātha, a disciple of Samvidānandanātha, and the other attributes it to Brahmānandanātha, a disciple of Śrīlōkanandanātha

Beginning :

अथ सक्षेपतो बालादीक्षा लिख्यते । वक्ष्यमाणप्रकारेण मण्टपान्तं प्रविश्य, अनुज्ञामादाय, गुरुवरणादि अभ्युदय कृत्वा, तत मण्टपं वीक्षणादिचतुस्सस्कारैस्सस्कृत्य, मण्टपमलङ्कृत्य, धूपयित्वा, वास्त्वीशदीपनाथपूजां कृत्वा, भूतोत्सारण विधाय, भूमिं प्रार्थ्य,

* * * *

Colophon :

इति श्रीलोकानन्दनाथशिष्येण ब्रह्मानन्दनाथेन विरचिते शिवार्चनशिरोमणौ षोडशोल्लास ॥

End :

इति स्वगुरु प्रणम्य, तत शिष्य. श्रीगुरोरनुज्ञां लब्ध्वा, फलादिषड्रसोपेत ब्राह्मणान् भोजयेत् ॥

इति सक्षेपतो दीक्षाविधिस्समाप्तः ॥

पूर्णदीक्षाक्रमो देवि यस्य कस्यापि नोच्यते ।
द्वादशाब्द गुरुश्शिष्य परीक्ष्य क्रम मु(उ)च्यते ॥
पूर्णदीक्षाविधिस्सम्यक् मया ते सप्रकाशित ।
समासेन वरारोहे कि भूयश्श्रोतुमिच्छसि ॥

Colophon:

इति परानन्दतन्त्रे सर्वागमोत्तमे सपादलक्षग्रन्थे मन्त्रखण्डे मोक्षद्वितीयपादे द्वात्रिशद्दीक्षासपुटितसङ्क्षेपक्रमो नाम षोडशोद्रेक. ॥

Colophon:

इति श्रीपूर्णविद्येश्वरीसंविदानन्दनाथशिष्येण श्रीनारायणानन्दनाथेन विरचिते शिवार्चनशिरोमणौ एकविशोल्लास ॥

Colophon:

इति श्रीलोकानन्दनाथशिष्यब्रह्मानन्दनाथविरचिते शिवार्चनशिरोमणौ(एक)विंशोल्लास· ॥

No 5728. शिष्यलक्षणम्.
ŚISYALAKSANAM

Pages, 6 Lines, 9 on a page

Begins on fol 41*a* of the MS described under No 435
Complete
On the requisite characteristics of a good Śakta disciple

Beginning:

श्रीदेव्युवाच—

भगवन् श्रोतुमिच्छामि शिष्यस्य शुभलक्षणम् ।
उपदेशक्रमं तस्य दीक्षाभेद च मे वच(द) ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण जायते दिव्यभावना ॥

वेदाभ्यासैकनिरत गुरुभक्तिसमन्वितम् ।
सर्वलक्षणसपन्न शमादिगुणसयुतम् ॥
दृढव्रत सदाचार साधुसज्जनसंमतम् ।
* * * *
इत्यादिलक्षणोपेत गुरु शिष्य परिग्रहेत् ।
कौलदीक्षागुरुस्सम्यक् चतुस्तम्भैर्विराजितम् ॥
मण्टप कारयेत्सम्यग्वितानाद्यैरलङ्कृतम् ।

End:

शिष्यमाहूय दीक्षार्थं यथावत्क्रियतां गुरुः ।
बल्युद्वासनकाले तु उच्छिष्ट देवि दीयताम् ॥
श्रीपात्रबिन्दुमुद्धृत्य स्वात्मपात्रेण पूरयेत् ।
पूर्णाभिषेकसिद्ध्यर्थं दीपेन सह दीयताम् ॥

तत्रादौ सङ्कल्प कृत्वा, ब्राह्मणैस्सह पुण्याह वाचयित्वा, गुरुवरण कुर्यात् । अमुकगोत्रोत्पन्नोऽहममुकशाखाध्यायिना अभिषेकपूर्वकं श्रीविद्योपदेशार्थं गुरुत्वेन त्वामहं क(वृ)णे । वृतोऽस्मि करिष्यामीति गुरुर्वदेत् । तथा यथोचित कर्म कुरुष्वेति गुरु प्रति शिष्यो वदेत् । करवाणीति गुरुर्वदेत् । गुरु. दीक्षादिक सर्वं कुर्यात् ।

No 5729. श्रीचक्रपूजा.
ŚRĪCAKRAPŪJĀ

Pages, 35 Lines, 7 on a page
Begins on fol 14*a* of the MS described under No 5445
Complete
On the worship of the Śrīcakra

Beginning:

श्रीचक्रपूजाप्रकारः—

सरस्वत्यै नम । गुरूपदिष्टप्रकारेण ऋष्यादिकरपञ्चाङ्गन्यास कृत्वा

देवीं ध्यात्वा पूजामारभेत् । स्वदक्षिणभागे त्रिकोणवृत्तचतुरश्रमण्डलं विलिख्य, गन्धादिभिरभ्यर्च्य, तदुपरि कलशस्याधार प्रतिष्ठाप्य, ऐं अग्निमण्डलाय धर्मप्रदकलशात्मने श्रीमहात्रिपुरसुन्दर्या अर्घ्यपात्राधाराय नमः ।

End :

ततो वर्णन्यास.—

मूर्ध्नि गुह्ये च हृदये नेत्रत्रितय एव च ।
श्रोत्रयोर्युगले चैव मुखे च भुजयोस्तथा ॥
पृष्ठजान्वोश्च नाभौ च न्यसेत्पञ्चदशाक्षरीम् ।
एवं न्यासं कृत्वा भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्—

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहासितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरा जपविधौ स्मराम्यम्बिकाम् ॥
ततो मूलमन्त्र जपेत् ॥

No 5730. श्रीचक्रपूजाविधानम्.

ŚRĪCAKRAPŪJĀVIDHĀNAM

Pages, 27 Lines, 24 on a page

Begins on fol 81*a* of the MS described under No 2447.
Complete
Similar to the above

Beginning :

प्राणानायम्य, सङ्कल्प्य, यथाशक्ति सम्भवद्भिरुपचारैस्सम्भवद्भिर्नियमैश्च गुरुदेवताप्रीतिं कामयमान इष्टदेवतायजन करिष्य इति सङ्कल्प्य, ततो हेतुकलशस्थापनविधिः ।

वस्तुधानीचा(न्याश्चा)गमने चर्मान्वाकं पठेद्धुध । चर्मावाभिन्दन्ति महीयामेवैषु दधति इति पठित्वा योगिनीहस्ते स्थित कलश गृहीत्वा, वामदेवाय फं नम इति सप्तवारमभिमन्त्र्य ।

End :

स्वय पूर्णपात्रं स्वीकृत्य, सर्वाणि पात्राणि प्रक्षाल्य, सङ्गृह्य गोपयित्वा यथासुखं विहरेत ॥

Colophon :

श्रीचक्रपूजाविधिस्समाप्तः ॥

No 5731. श्रीचक्रलेखनप्रकारः.

ŚRĪCAKRALĒKHANAPRAKĀRAH

Pages, 23 Lines, 7 on a page

Begins on fol 70*a* of the MS described under No 3472

Complete

On the construction of the Śrīcakra for conducting therewith the worship of Śakti

Beginning :

अथ श्रीविद्याचक्रलेखनप्रकार उच्यते—

बिन्दुत्रिकोणवसुकोणदशारयुग्म मन्वश्रिनागदळसंयुतषोडशारम् ।
वृत्तत्रिभूपुरयुतं परितश्चतुर्द्वाः श्रीचक्रमेतदुदित परदेवताया' ॥

. . क्तरीत्या विशदीक्रियते—

षण्णवत्यङ्गुळायाम सूत्र प्राक्पश्चिमायतम् ।
चतुर्भिरङ्गुळैश्शिष्टैस्सवृतानि च(तं च स)भूपुरम् ॥
अन्तर्नवाङ्गुळ ज्ञेय मध्ये सूत्रञ्च षोडश ।
एकादशाङ्गुळ ज्ञेयमष्टपत्रं समालिखेत् ॥

End :

ऐं, क्लीं, सौ , अं, आ, सौ' ।
इति चक्रनायकबीजानि तत्तदावरणपुरतो लिखेत् ॥

Colophon:

इति श्रीचक्रलेखनीयक्रमस्सपूर्ण. ॥

No 5732. श्रीचक्रविवरणम्.

ŚRĪCAKRAVIVARANAM

Pages, 18 Lines, 7 on a page

Begins on fol 17*a* of the MS described under No 745

Complete

Gives a description of the Śrīcakra, otherwise known as Śrīvidyācakra

Beginning:

अथ श्रीविद्याचक्रराज उच्यते—

बिन्दुत्रिकोणवसुकोणदशारयुग्ममन्वश्रिनागदलसयुतषोडशारम् ।
वृत्तत्रय च धरणीसदनत्रय च श्रीचक्रमेतदुदित परदेवतायाः ॥

तत्र दशारयुग्म दशकोणद्वय मन्वश्र चतुर्दशकोणम् ।

End:

अस्या अन्याक्षराणि नामानि च सन्ति । तपयो तवर्गपवर्गयो द्वितीयं द्वितीयाक्षरादिनामानि त्यजेत् । न सन्तीत्यर्थ । अन्ते यादिक्षान्ते नवम ळकारादिम नास्ति ॥

No 5733. श्रीचक्राधिष्ठानदेवताश्लोकाः.

ŚRĪCAKRĀDHISTHĀNADĒVATĀŚLŌKĀH

Pages, 2 Lines, 5 on a page

Begins on fol 29*a* of the MS described under No 3472

Wants beginning and end

Stanzas giving the name of the various deities presiding over the various parts of the Śrīcakra, with the appropriate parts assigned to each of them in order

Beginning:

तस्योपरि मणिफलके तारुण्योत्तुङ्गपीकुचकुम्भाम्।
सङ्क्षोभिणीप्रधानां शान्तिं विद्रावयन्तु वशमुद्राः ॥

End:

सदनन्योपरितना सर्वानन्दमयनामके बिन्दौ।
पञ्चब्रह्माकारं . . . . . र्णम् ॥

No 5734 श्रीदेवीपूजाविधानम्.
ŚRĪDĒVĪPŪJĀVIDHĀNAM

Pages, 274 Lines, 7 on a page

Begins on fol 26*a* of the MS described under No 745
Complete
On the worship of the goddess Śakti

Beginning:

अथ प्रातस्समुत्थाय गुरून् नत्वा स्वनामभि ।
ब्रह्मरन्ध्रे सहस्रारे कर्पूरदलगो गुरु ॥
नताभयकरो नित्य ब्रह्मरूपी सदाशिवः ।

श्रीविद्यामन्त्रसाधकोऽत्र ब्राह्मे मुहूर्ते शयनादुत्थाय गृहाद्बहिर्निर्गत्य कृतदन्तधावन शौचाचमनादिक निर्वर्त्य शुद्धे शुक्ले वाससी परिधाय . .
. . . . . .
ओं परप्रकाशानन्दनाथाय नम , ओं परमशिवोत्तमानन्दनाथाय नमः, ओं पराशक्तिपराम्बिकायै नमः ।

End:

येन देहेऽपि विन्यस्य शक्तितुल्यो नरो भवेत्।
कुपितः कुरुते यागी त्रैलोक्यस्यापि पातनम् ॥
शक्तिन्यासकृतो वीरो नमस्कारेण शङ्कर ।
निधनं कुरुते साक्षात्पाषाणप्रतिमादिषु ॥

इति महाशाक्तिन्यास ।

अग्रबिन्दुपरिकल्पिताननामन्यबिन्दुरुचिरां तनुद्वयाम् ।
नादबिन्दुरसनाकळास्पदां नौमि ते परशिवे परां कळाम् ॥
मिहिरबिन्दुमुखीं दधदुल्लसच्छशिहुताशनबिन्दुयुगश्रियम् ।
महपरार्धकळारशनास्पदा भजत तत्त्वमिमां परमां कळाम् ॥

इति ध्यान पञ्चोपचारा. ॥

No 5735. श्रीविद्यापूजाविधानम्.

ŚRĪVIDYĀPŪJĀVIDHĀNAM

Pages 4 Lines, 10 on a page

Begins on fol 942*a* of the MS described under No. 124

Complete

Similar to the one described under No 5729

Beginning :

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ अस्माकं सहकुटुम्बानां मम . . र्थमिष्टदेवतामुद्दिश्य इष्टदेवताप्रीत्यर्थं यावच्छक्तयध्यानावाहनादिषोडशोपचारपूजा करिष्ये । कलशपूजा कुर्यात् । पीठपूजां करिष्ये । आधारशक्त्यै नमः कूर्माय नमः ।

* * * *

इति ध्यात्वा प्राणप्रतिष्ठां कुर्यात् ।

महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

आवाहिता भव ।

End :

देहस्थाखिलदेवता गजमुखा क्षेत्राधिपा भैरवा
योगिन्यो वटुकाश्च यक्षपितरो बेतालकाश्चेटका. ।

अन्ये दिक्चरखेचरा निशिचरा भूता पिशाचोरगाः
तृप्तास्स्युः कुलपुत्रकस्य पिबतः पान सदीप चरुम् ॥

एव शान्तिः ॥

Colophon

इति पूजाविधान सम्पूर्णम् ॥

No 5736 श्रीविद्याम्नायोपनिषद्.

ŚRIVIDYĀMNĀYŌPANISAD

Pages, 8 Lines, 8 on a page

Begins on fol 44*a* of the MS described under No 514

Complete

Regarding Śrīvidyā in the style of an Upanisad

Beginning :

अथ श्रीविद्यामनोराम्नाय उपदिश्यते—

ब्रह्मचारिणे शान्ताय गुरुभक्ताय यथा विद्यामनु [1] कस्मिन्नुद्भव. [1] तत्स्वरूपं ब्रूहीति होवाच । इह शृणु सौम्य ब्रह्मवाचकस्तु प्रणवो वर्तते । स पुरा प्रपञ्चाधिष्ठानविद्यासहितत्रिमात्रोपाहितः । का मात्रा [2]

* * * *

नान्येव परा पश्यन्ती मध्यमा श्रुतिगोचरा ।
मध्यमाद्योतितार्था हि पश्यन्ती ध्वनि. परा चेत्येवमर्थः(?) ॥

End :

कलशः कुम्भ इत्येकार्थवाचक इव मन्त्रो गुरुरित्येकार्थवाचकस्त्विह मन्त्रादि तथा नेति बुद्ध्या पुरुषार्थवान्न भवेत् ॥

इति तृतीयः खण्डः ॥

Colophon :

इत्युत्तरतापिनीखण्डसम्पूर्णः ॥
इत्याम्नायोपनिषत्समाप्ता ॥

No 5737 श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM

Substance, palm-leaf Size, 15⅝ × 1½ inches Pages, 6 Lines, 6 on a page Character, Telugu Condition, much injured Appearance, old

Begins on fol. 9*a* The other works herein are Namaskāradaśaka 1*a*, Daśaslōkī 1*b*, Rahasyayāgalakṣana 3*a*, Saubhāgyaratnākara 7*a*, Jyautiṣavisaya 15*a*, Indrākṣīstrōtra 19*a*, Dhūmravārāhīmantra 23*a*, Śarabhasāluvamantra 27*a*, Hanūmanmālāmantra 29*a*, Agnikavaca 30*b*, Sudarsanamālāmantra 31*b*, Vandhyākalpa 36*a*, Pratyangirāmantrapārāyana 46*a*

Complete

A work giving the mystic meaning of each of the letters of the Śrīvidyā mantra, the deities represented by those letters and also the explanation of certain aphorisms declaring the main principles of the Śākta religion by Gaudapādācārya, disciple of Śukayōgīndra.

Beginning :

अथ शाक्तमन्त्रागमजिज्ञासा । आत्मैवाखण्डाकार । चैतन्यस्वरूपा शक्ति । सैव विद्या । तत्त्वत्रयेणाभिधा ।

End :

अथ ह्रस्वाक्षरषट्कदीर्घपञ्चसमुच्चतथै(यै)व सङ्कुचापरा शाम्भवी । अनुत्तरसङ्केतप्रधानविद्या सप्तदशवर्णविशिष्टा । अथैतासां परिवाराणामनुपरिवारा असङ्कुचाताः ॥

Colophon

इति श्रीमत्परमहसपरिव्राजकाचार्यश्रीशुकयोगीन्द्रशिष्यश्रीमद्गौडपादाचार्येण विरचितानि सूत्राणि समाप्तानि ॥

गौडपादार्यसूत्राणि पल्लङ्क्यन्वयसम्भवः ।
(वि)लिलेखाच्चनो नाम रौद्र्यब्दे भानुवासरे ॥

No 5738. श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM

Pages, 4 Lines, 6 on a page

Begins on fol 159*a* of the MS described under No 673

Complete

Same work as the above

No 5739. श्रीविद्यारत्नसूत्रम्

ŚRĪVIDYĀRATNASŪTRAM

Pages, 5 Lines, 6 on a page

Begins on fol 90*a* of the MS described under No. 537.

Complete

Same work as the above

No 5740. श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM

Pages, 6 Lines, 5 on a page

Begins on fol 60*a* of the MS described under No 29

Incomplete

Same work as the above

No 5741. श्रीविद्यारत्नसूत्रदीपिका.

ŚRĪVIDYĀRATNASŪTRADĪPIKĀ

Pages, 27 Lines, 23 on a page

Begins on fol 142*a* of the MS described under No 3907

Complete

A commentary on the Śrīvidyāratnasūtra of Gaudapādācārya by Vidyāraṇyamuni.

Beginning:

श्री[देवि]विद्या(रत्न)सूत्राणां वाक्यार्थप्रतिपादने ।
भगवत्याः प्रसादेन क्रियते दीपिका मया ॥

सा भगवती जगत्सृष्ट्वेदं तस्मिन् देवादीनुत्पाद्य तेषामनुग्रहाय स्वभक्तानां पुरुषार्थाय भण्डासुरसंहरणायापि च ब्रह्मण. प्रकाशा चिद्देवीरूपेणाभिव्यक्ता सती . . . . . तदीयशास्त्रप्रकटनार्थं तदुपासकानां ज्ञात्वानुष्ठानतया पुरुषार्थाय भगवता गौडपादेन तद्रहस्यं सर्वमन्त्ररत्नसूत्रै त्रि(कृ)तमादि(मथ)शाक्तमन्त्रा(गम)जिज्ञासेति । स सूत्रार्थो वर्ण्यते प्रसादेन तस्या । अल्पाक्षरमसन्दिग्ध सारवद्विश्वतोमुखमिति सूत्रलक्षणम् ।

End :

अनुत्तरसङ्केतप्रधानविद्या सप्तदशवर्णविशिष्टा ।
अथैतासां परिवाराणामनुपरिवारा असङ्ख्याता ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविद्यारण्यविरचितरत्नसूत्रदीपिका समाप्ता ॥

No 5742. श्रीविद्यारत्नसूत्रदीपिका.

ŚRĪVIDYĀRATNASŪTRADĪPIKĀ.

Pages, 37 Lines, 16 on a page

Begins on fol 116*a* of the MS. described under No 424

Complete

Same work as the above

In the colophon at the end of this manuscript, this work is attributed to Śrīśankarāranyamuni, a disciple of Śrī-Vidyāranya muni.

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विद्यारण्यमुनिवर्यशिष्यश्रीशङ्करारण्यमुनिकृता श्रीविद्यारत्नदीपिका समाप्ता ॥

No 5743. श्रीविद्याविलासः.

ŚRĪVIDYĀVILĀSAH

Substance, paper. Size, 13 × 8⅓ inches Pages 398 Lines, 21 on a page Character, Telugu Condition, good Appearance new

Complete

A work on Śrī-Vidyā by Gaganānanda, a disciple of Śaṅkarācārya

The subjects treated of herein are —

१. उपासकदिनचर्या.
२. सुन्दरीपूजा.
३. प्राणायाम .
४. श्रीचक्रपूजा.
५. आवरणपूजा.
६. पारायणक्रम .
७. पुरश्चर्याविधि.

Beginning:

शिञ्जन्नूपुरपादं धृतपाशाङ्कुश[कु]सु[म]बाणकोदण्डम् ।
करुणामसृणापाङ्ग कैवल्यायास्तु किञ्चन महो न. ॥

